श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीव्यासराजयति विरचितम्

# ॥ श्रीनिवासस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुजमहादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीनिवासस्तोत्रम् ॥

प्रातः स्मरामि रमया सह वेङ्कटेशं
मन्दस्मितं मुखसरोरुहकान्तिरम्यम्।
माणिक्यकान्तिविलसन्मुकुटोर्ध्वपुण्ड्रं
पद्माक्षलक्षमणिकुण्डलमण्डिताङ्गम्॥ १ ॥

प्रातर्भजामि कररम्यसुशङ्खचक्रं
भक्ताभयप्रदकटिस्थदत्तपाणिम्।
श्रीवत्सकौस्तुभलसन्मणिकाञ्चनाढ्यं
पीताम्बरं मदनकोटिसुमोहनाङ्गम्॥ २ ॥

प्रातर्नमामि परमात्मपदारविन्दम्
आनन्दसान्द्रनिलयं मणिनूपुराढ्यम्।
एतत् समस्तजगतामिति दर्शयन्तं
वैकुण्ठमत्र भजतां करपल्लवेन॥ ३ ॥

व्यासराजयतिप्रोक्तं श्लोकत्रयमिदं शुभम्।
प्रातः काले पठेद्यस्तु पापेभ्यो मुच्यते नरः॥ ४ ॥

॥ इति श्रीनिवासस्तोत्रं संपूर्णम्॥

www.prapatti.com